# sadAshivAShTakam

# સદાશિવાષ્ટકમ્ શ્રીશિવપઙ્ચચામરસ્તોત્રં ચ

## Document Information

Text title : sadAshivAShTakam

File name : sadashiva8.itx

Category : aShTaka, shiva

Location : doc_shiva

Author : patanjalikRitam sadAshivAShTakam

Transliterated by : N.Balasubramanian bbalu at satyam.net.in

Proofread by : N.Balasubramanian bbalu at satyam.net.in

Description-comments : halAsyamAhAtmye. Also known as Shri Sabhapati Stotram on Deity veLLiambala sabhApati, Madurai

Latest update : July 2, 2008

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 15, 2019

*sanskritdocuments.org*

# સદાશિવાષ્ટકમ્ શ્રીશિવપઙ્ચચામરસ્તોત્રં ચ

શ્રીસભાપતિ સ્તોત્રં ચ

પતઞ્જલિરુવાચ -

સુવર્ણપદ્મિની-તટાન્ત-દિવ્યહર્મ્ય-વાસિને

સુપર્ણવાહન-પ્રિયાય સૂર્યકોટિ-તેજસે ।

અપર્ણયા વિહારિણે ફણાધરેન્દ્ર-ધારિણે

સદા નમશ્શિવાય તે સદાશિવાય શંભવે ॥ ૧॥

સતુઙ્ગ ભઙ્ગ જહ્નુજા સુધાંશુ ખણ્ડ મૌળયે

પતઙ્ગપઙ્કજાસુહૃત્કૃપીટયોનિચક્ષુષે ।

ભુજઙ્ગરાજ-મણ્ડલાય પુણ્યશાલિ-બન્ધવે

સદા નમશ્શિવાય તે સદાશિવાય શંભવે ॥ ૨॥

ચતુર્મુખાનનારવિન્દ-વેદગીત-ભૂતયે

ચતુર્ભુજાનુજા-શરીર-શોભમાન-મૂર્તયે ।

ચતુર્વિધાર્થ-દાન-શૌણ્ડ તાણ્ડવ-સ્વરૂપિણે

સદા નમશ્શિવાય તે સદાશિવાય શંભવે ॥ ૩॥

શરન્નિશાકર પ્રકાશ મન્દહાસ મઞ્જુલા

ધરપ્રવાળ ભાસમાન વક્ત્રમણ્ડલ શ્રિયે ।

કરસ્ફુરત્કપાલમુક્તરક્ત-વિષ્ણુપાલિને

સદા નમશ્શિવાય તે સદાશિવાય શંભવે ॥ ૪॥

સહસ્ર પુણ્ડરીક પૂજનૈક શૂન્યદર્શનાત્-

સહસ્રનેત્ર કલ્પિતાર્ચનાચ્યુતાય ભક્તિતઃ ।

સહસ્રભાનુમણ્ડલ-પ્રકાશ-ચક્રદાયિને

સદા નમશ્શિવાય તે સદાશિવાય શંભવે ॥ ૫॥

રસારથાય રમ્યપત્ર ભૃદ્રથાઙ્ગપાણયે

રસાધરેન્દ્ર ચાપશિઞ્જિનીકૃતાનિલાશિને ।

સ્વસારથી-કૃતાજનુન્નવેદરૂપવાજિને
સદા નમશ્શિવાય તે સદાશિવાય શંભવે ॥ ૬॥

અતિ પ્રગલ્ભ વીરભદ્ર-સિંહનાદ ગર્જિત
શ્રુતિપ્રભીત દક્ષયાગ ભોગિનાક સદ્મનામ્ ।
ગતિપ્રદાય ગર્જિતાખિલ-પ્રપઞ્ચસાક્ષિણે
સદા નમશ્શિવાય તે સદાશિવાય શંભવે ॥ ૭॥

મૃકણ્ડુસૂનુ રક્ષણાવધૂતદણ્ડ-પાણયે
સુગન્ધમણ્ડલ સ્ફુરત્પ્રભાજિતામૃતાંશવે ।
અખણ્ડભોગ-સમ્પદર્થલોક-ભાવિતાત્મને
સદા નમશ્શિવાય તે સદાશિવાય શંભવે ॥ ૮॥

મધુરિપુ-વિધિ શક્ર મુખ્ય-દેવૈરપિ નિયમાર્ચિત-પાદપઙ્કજાય ।
કનકગિરિ-શરાસનાય તુભ્યં રજત સભાપતયે નમશ્શિવાય ॥ ૯॥

હાલાસ્યનાથાય મહેશ્વરાય હાલાહલાલંકૃત કન્ધરાય ।
મીનેક્ષણાયાઃ પતયે શિવાય નમો-નમસ્સુન્દર-તાણ્ડવાય ॥ ૧૦॥

॥ ઇતિ શ્રી હાલાસ્યમાહાત્મ્યે પતઞ્જલિકૃતમિદં સદાશિવાષ્ટકમ્ ॥

Also known as Shri Sabhapati Stotram on Deity veLLiambala sabhApati, Madurai
Encoded and proofread by
N. Balasubramanian bbalu at satyam.net.in

---

*sadAshivAShTakam*

pdf was typeset on December 15, 2019

Please send corrections to *sanskrit@cheerful.com*